योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ११३

त्रयोदशोत्तरशततमः सर्गः ११३

श्रीवसिष्ठ उवाच ।

एषा हि वासना नित्यमसत्यैव यदुत्थिता ।

द्विचन्द्रभ्रान्तिवत्तेन त्यक्तुं राघव युज्यते ।। १

अविद्या विद्यमानेव नष्टप्रज्ञेषु विद्यते ।

नाम्नैवाङ्गीकृताभावात्सम्यक्प्रज्ञेषु सा कुतः ।। २

मा भवाज्ञो भव प्राज्ञः सम्यग्राम विचारय ।

नास्त्येवेन्दुर्द्वितीयः खे भ्रान्त्या संलक्ष्यते मुधा ।। ३

नात्र तत्त्वादृते किंचिद्विद्यते वस्त्ववस्तु च ।

ऊर्मिमालिनि विस्तीर्णे वारिपूरादृते यथा ।। ४

स्वविकल्पादृते नैतान्भावाभावानसन्मयान् ।

नित्येऽसिते तते शुद्धे मा समारोपयात्मनि ।। ५

नासि कर्ता किमेतासु क्रियासु ममता तव ।

एकस्मिन्विद्यमाने हि किं केन क्रियते कथम् ।। ६

मा वाऽकर्ता भव प्राज्ञ किमकर्तृतयेहिते ।

साध्यं साध्यमुपादेयं तस्मात्स्वस्थो भवानघ ।। ७

कर्ता संस्त्वमसक्तत्वाद्भावाभावे रघूद्वह ।

असक्तत्वादकर्तापि कर्तृवत्स्पन्दनं कुतः ।। ८

सत्यं स्याच्चेदुपादेयं मिथ्या स्याद्धेयमेव चेत् ।

उपादेयैकसक्तत्वाद्युक्ता सक्तिर्हि कर्मणि ।। ९

यत्रेन्द्रजालमखिलं मायामयमवस्तुकम् ।

तत्र कास्था कथं नाम हेयोपादेयदृष्टयः ।। १०

संसारबीजकणिका यैषा विद्या रघूद्वह ।
एषा ह्यविद्यमानैव सतीव स्फारतां गता ।। ११
येयमाभोगिनिःसारा संसारारम्भचक्रिका ।
विज्ञेया वासनैषा सा चेतसो मोहदायिनी ।। १२
चारुवंशलतेवान्तःशून्या निस्सारकोटरा ।
सरित्तरङ्गमालेव न व्युच्छिन्नापि नश्वरी ।। १३
गृह्यमाणापि हस्तेन ग्रहीतुं नैव युज्यते ।
मृद्वप्यत्यन्ततीक्ष्णाग्रा निर्झरोर्मिरिवोत्थिता ।। १४
दृश्यते प्रकराभासा सदर्थे नोपयुज्यते ।
तरङ्गिण्यतरङ्गाभा स्वाकारपरिनिष्ठिता ।। १५
क्वचिद्वक्राः क्वचित्स्पष्टा दीर्घाः खर्वाः स्थिराश्चलाः ।
यत्प्रसादोद्भवास्तस्माद्व्यतिरेकमुपागताः ।। १५
अन्तःशून्यापि सर्वत्र दृश्यते सारसुन्दरी ।
न क्वचित्संस्थितापीह सर्वत्रैवोपलक्ष्यते ।। १७
जडैव चिन्मयीवासावन्यस्पन्दोपजीविनी ।
निमेषमप्यतिष्ठन्ती स्थैर्याशङ्कां प्रयच्छति ।। १८
ज्वालावच्छुद्धवर्णापि मषीमलिनकोटरा ।
वल्गत्यन्यप्रसादेन दीयते तदवेक्षणात् ।। १९
आलोके विमले म्लाना तमस्यपि विराजते ।
मृगतृष्णेव शुष्काभा नानावर्णविलासिनी ।। २०
वक्रा विषमयी तन्वी मृद्वी संकटकर्कशा ।
ललनाचञ्चला लुब्धा तृष्णा कृष्णेव भोगिनी ।। २१
स्वयं दीपशिखेवाशु क्षीयते स्नेहसंक्षये ।
सिन्दूरधूलिलेखेव विना रागं विराजते ।। २२
क्षणप्रकाशतरला कृतसंस्था जडाशया ।
मुग्धानां त्रासजननी वक्रा विद्युदिवोदिता ।। २३

यत्नाद्गृहीत्वा दहति भूत्वा भूत्वा प्रलीयते ।

लभ्यतेऽपि हि नान्विष्टा विद्युद्वदतिभङ्गुरा ।। २४

अप्रार्थितैवोपनता रमणीयाप्यनर्थदा ।

अकालपुष्पमालेव श्रेयसेनाभिनन्दिता ।। २५

अत्यन्तविस्मृतैवातिसुखाय भ्रमदायिनी ।

दुःस्वप्नकलनेवेयमनर्थायैव तर्किता ।। २६

प्रतिभासवशादेषा त्रिजगन्ति महान्ति च ।

मुहूर्तमात्रेणोत्पाद्य धत्ते ग्रासीकरोति च ।। २७

मुहूर्तो वत्सरश्रेणी लवणस्यानया कृता ।

रात्रिर्द्वादशवर्षाणि हरिश्चन्द्रस्य निर्मिता ।। २८

वियोगिनामथान्येषां कान्ताविभवशालिनाम् ।

रात्रिर्वत्सरवद्दीर्घा भवेत्तस्याः प्रसादतः ।। २९

सुखितस्याल्पतामेति दुःखितस्यैति दीर्घताम् ।

कालो यस्याः प्रसादेन विपर्यासैकशीलिनाम् ।। ३०

अस्याः स्वसत्तामात्रेण कर्तृतैतासु वृत्तिषु ।

दीपस्यालोककार्याणां यथा तद्वन्न वस्तुतः ।। ३१

सनितम्बस्तनी चित्रे न स्त्री स्त्रीधर्मिणी यथा ।

तथैवाकारचिन्तेयं कर्तुं योग्या न किंचन ।। ३२

मनोराज्यमिवाकारभासुरा सत्यवर्जिता ।

सहस्रशतशाखापि न किंचित्परमार्थतः ।। ३३

अरण्ये मृगतृष्णेव मिथ्यैवाडम्बरान्विता ।

विडम्बयति तान्मुग्धमृगानेव न मानुषान् ।। ३४

फेनमालेव संजातध्वस्ता विच्छेदवर्जिता ।

जडेव चञ्चलाकारा गृह्यमाणा न किंचन ।। ३५

अटत्युड्डामराकारा रजःप्रसरधूसरा ।

बलात्कल्पान्तवात्येव स्वाक्रान्तभुवनान्तरा ।। ३६

धूमालीवाङ्गसंलग्ना दाहखेदप्रदायिनी ।

गर्भीकृतरसाक्रम्य जगन्ति परिवर्तते ।। ३७

धारा जलधरस्येव सुदीर्घा जलनिर्मिता ।

असारसंसारदृढा रज्जुस्तृणगणैरिव ।। ३८

तरङ्गोत्पलमालेव कल्पनामात्रवर्णिता ।

मृणालीव बहुच्छिद्रा पङ्कप्रौढा जलात्मिका ।। ३९

जनेन दृश्यते वृद्धितत्परा नच वर्धते ।

विषास्वाद इवापातमधुराऽन्ते सुदारुणा ।।४०

नष्टा दीपशिखेवैषा न जाने क्वेव गच्छति ।

मिहिकेवाग्रदृष्टापि गृह्यमाणा न किंचन ।। ४१

पांसुमुष्टिरिवाकीर्य प्रेक्षिता पारमाणवी ।

आकाशनीलिमेवैषा निर्निमित्तैव दृश्यते ।। ४२

द्विचन्द्रमोहवज्जाता स्वप्नवद्विहितभ्रमा ।

यथा नौयायिनः स्थाणुस्पन्दस्तद्वदिहोत्थिता ।। ४३

अनयोपहते चित्ते दीर्घकालमिवाकुलैः ।

जनैराकल्प्यते दीर्घसंसारस्वप्नविभ्रमः ।। ४४

अनयोपहते स्वस्मिंश्चित्राश्चेतसि विभ्रमाः ।

उत्पद्यन्ते विनश्यन्ति तरङ्गास्तोयधेरिव ।। ४५

मनोज्ञमपि सत्यं च दृश्यते सदसत्तया ।

अमनोज्ञमसत्यं च दृश्यते सत्तयाप्यसत् ।। ४६

पदार्थरथमारूढा भावनैषा बलान्विता ।

आक्रामति मनः क्षिप्रं विहगं वागुरा यथा ।। ४७

करुणास्यन्दमानाक्षी स्रवन्क्षीरलवस्तनी ।

भवत्युल्लसितानन्दं जननी गृहिणी यथा ।। ४८

विषीकरोति निःस्यन्दसंतर्पितजगत्त्रयम् ।

सुधार्द्रार्द्रमपि क्षिप्रं प्रवृद्धं बिम्बमैन्दवम् ।। ४९

उन्मत्तरववेतालनर्तनारम्भसंभ्रमम् ।

स्थाणवः संप्रयच्छन्ति मूका अप्येतयान्धया ।। ५०

संध्यादिषु च कालेषु लोष्टपाषाणभित्तयः ।

अस्याः प्रसादात्दृश्यन्ते सर्पाजगरदृष्टिभिः ।। ५१

एकोऽपि द्वितयोदेति यथा द्विशशिदर्शने ।

दूरमभ्याशतां याति स्वप्ने स्वमरणं यथा ।। ५२

आदीर्घं क्षणतामेति कालस्येष्टा यथा निशा ।

क्षणो वर्षमिवाभाति कान्ताविरहिणामिव ।। ५३

न तदस्तीह यन्नाम न करोतीयमुद्धता ।

अस्यास्त्वकिंचनायास्तु शक्ततां पश्य राघव ।। ५४

संरोधयेत्प्रयत्नेन संविदेवाशु संविदम् ।

सरित्स्रोतोनिरोधेन शुष्यत्येषा मनोनदी ।। ५५

श्रीराम उवाच ।

अविद्यमानयैवेदं पेलवांग्या सुतुच्छया ।

मिथ्याभावनया नाम चित्रमन्धीकृतं जगत् ।। ५६

अरूपया निराकृत्या चारुचेतनहीनया ।

असत्येवाप्यनश्यन्त्या चित्रमन्धीकृतं जगत् ।। ५७

आलोकेन विनश्यन्त्या स्फुरन्त्या तमसोन्तरे ।

कौशिकेक्षणधर्मिण्या चित्रमन्धीकृतं जगत् ।। ५८

कुकर्मैकान्तकारिण्या न सहन्त्या विलोकनम् ।

देहमप्यविजानन्त्या चित्रमन्धीकृतं जगत् ।। ५९

सुदीनाचारधर्मिण्या नित्यं प्राकृतकान्तया ।

अनारतास्तंगतया चित्रमन्धीकृतं जगत् ।। ६०

अनन्तदुःखाकुलया सदैव मृतयानया ।

संबोधहीनया यत्र चित्रमन्धीकृतं जगत् ।। ६१

कामकोपघनाङ्गिन्या तमःप्रसरवक्रया ।

अचिरेणाशरीरिण्या चित्रमन्धीकृतं जगत् ।। ६२

स्वात्मान्धरूपास्पदया जडया जाड्यजीर्णया ।

दुःखदीर्घप्रलापिन्या चित्रमन्धीकृतं जगत् ।। ६३

पुरुषासङ्गसङ्गिन्या रागिण्या क्रिययानया ।

विद्रवन्त्या विवक्षासु चित्रमन्धीकृतः पुमान् ।। ६४

पुरुषस्य न या शक्ता सोढुमीक्षितुमप्यलम् ।

तया स्त्रियावरणया चित्रमन्धीकृतः पुमान् ।। ६५

न यस्याश्चेतनैवास्ति याप्यनष्टैव नश्यति ।

तया स्त्रिया परुषया चित्रमन्धीकृतः पुमान् ।। ६६

अनन्तदुष्प्रसरविलासकारिणी

क्षयोदयोन्मुखसुखदुःखभागिनी ।

इयं प्रभो विगलति केन वाऽसमा

मनोगुहानिलयनिबद्धवासना ।। ६७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे अविद्यावर्णनं नाम त्रयोदशोत्तरशततमः सर्गः ।। ११३ ।।